# Haritaki

दक्षंप्रजापतिंस्वस्थमश्विनौवाक्यमूचतुः ।
कुतोहरीतकीजातातस्यास्तुकतिजातयः ।।
रसाः कतिसमाख्याताः कतिचोपरसाः स्मृताः ।
नामानिकतिचोक्तानिकिंवातासांचलक्षणम् ।।
केचवर्णगुणाः के च का च कुत्रप्रयुज्यते ।
केनद्रव्येणसंयुक्ताकांश्चरोगान्व्यपोहति ।।

प्रश्नमेलद्यथापृष्टं भगवन्वक्तुमर्हसि ।
अश्विनोर्वचनं श्रुत्वादक्षोवचनमब्रवीत् ।।

पपातबिंदुर्मेदिन्यांशक्रस्यपिवतोऽमृतम् ।
ततोदिव्यात्समुत्पन्नासप्तजातिर्हरीतकी ।।

हरितक्यभयापथ्याकायस्थापूतनामृता ।
हैमवत्यव्यथाचापिचेतकीश्रेयसीशिवा ।।
वयस्थाविजयाचापिजीवन्तीरोहिणीति च ।

अलाबुवृत्ताविजयावृत्तासारोहिणी स्मृता ।।
पूतानास्थिमतीसूक्ष्माकथितामांसलाऽमृता ।

पंचरेखाभयाप्रोक्ताजीवन्तीस्वर्णवर्णिनी ।।
त्रिरेखाचेतकीज्ञेयासप्तानीमियमाकृतिः । **(Bpn)**

Aswini kumara approached daksa prajapati and asked him from where was Haritaki originated? How many jatis? Which is the predominant rasa and which are the anurasas in it? What are its other names? What are its properties? What is its colour and guna? Which type is used in which

type of disease? With which substances when combined does it produce the required effects?

Daksa prajapathi after listening to these questions, answers them. Once when amrut was being consumed by Indra, a drop of it fell on the earth and got split into seven types and that was how Haritaki originated.

Haritaki, Abhaya, Pathya, Kayastha, Putana, Amrta, Haimavati, Avyatha, Cetaki, Sreyasi, Siva, Vayastha, Vijaya, Jivanti, Rohini are the synonyms for Haritaki.

Alabu vrtta is Vijaya, Vrtta is Rohini, Putana is Asthi mata and Suksma, Amrta is mamsala.

Abhaya is panca rekha yukta, Livanti is svarna varna, Cetaki is tri rekha yukta. These are the shapes of 7 types of Abhaya.

**विंध्याद्रौविजयाहिमाचलभवास्याच्चेतकीपूतना ।**
**सिंधौस्यादथरोहिणीतुविजयाजाताप्रतिस्थानके ।।**

**विजया हरितकी स्यादभया पथ्या व्यथा प्रपथ्या च ।**
**अमृता जया कायस्था हैमवती चेतकी शिवा साध्वी ।।**
**प्राणदा मानवी पथ्या (मानवी ? जीवन्ती) पञ्चभद्रिव ।**
**पिशाची पूतना चेति पर्यायैर्भद्रसप्तिका ।। (Aa ma)**

Origin:
Vijaya in Vindhya mountains, Cetaki in Himalaya, Putana in Sindh, Rohini similar to Vijaya.

Vijaya is called Haritaki
Abhaya is called Pathya, Vyatha, Prapathya
Amrta is called Jaya, Kayastha, Haimavati
Cetaki is called Siva, Sadhvi
Pranada is called Manavi, Pathya, Panchabhadrika
Pisaci is called Putana.

हरितक्यभया पथ्या कायस्था पूतनाऽमृता ।
हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा ॥
वयस्था विजया चारि जीवन्ती रोहिणीति च ।

विजया रोहिणी चैव पूतना चामृताऽभया ॥
जीवन्ती चेतकी चेति पथ्यायाः सप्तजातयः ।

अलाबुवृत्ता विजया वृत्ता सा रोहिणी स्मृता ॥
पूतनास्थिमती सूक्ष्मा कथिता मांसलाऽमृता ।

पञ्चरेखाऽभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी ॥
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः । **(Bpn)**

Haritaki, Abhaya, Pathya, Kayastha, Putana, Amrta, Haimavati, Vyatha, Cetaki, Sreyasi, Siva, Vayastha, Vijaya, Jivanti, Rohini are its synonyms.

Vijaya, rohini, Putana, Amrta, Abhaya, Jivanti, Cetaki are the seven types of Haritaki.

Alabu vrtta is Vijaya, Vrtta is Rohini, Putana is Asthi mata and Suksma, Amrta is Mamsala.

Abhaya is Panca rekha yukta, Jivanti is Svarna varna, Cetaki is Tri rekha yukta. These are the shapes of 7 types of Abhaya.

हरीतका हैमवती जयाऽभया
शिवाऽव्यथा चेतानिका च रोहिणी ।
पथया प्रपष्ट्रयाऽपि च पूतनाऽमृता
जीवप्रिया जीवनिका भिषग्वरा ॥
जावन्ती प्राणादा जीव्या कायस्था श्रेयसी च सा ।
देवी दिव्या च विजया वह्निनेत्रमिताभिधा ॥

हरितक्यमृतोत्पन्ना सप्तभेदैरुदीरिता ।
तस्य नामानि वर्णाश्च वक्ष्याम्यथ यथाक्रमम् ।।

विजया रोहिणी चैव पूतना चामृताऽभया ।
जीवन्ती चेतकी चेति नाम्ना सप्तविधा मता ।।

अलाबुनाभिर्विजया सुवृत्ता रोहिणी मता ।
स्वल्पत्वक् पूतना ज्ञेया स्थूलमांसाऽमृता स्मृता ।।
पञ्चास्त्रा चाभया ज्ञेया जीवन्ती स्वर्णवर्णभाक् ।
त्र्यस्त्रान्तु चेतकीं विद्यादित्यासां रुपलक्षणम् ।। (Rjn)

Haritaki is also called as Haimavati, Jaya, Abhaya, Siva, Avyatha, Cetanika, Rohini, Pathya, Prapastya, Putana, Amrta, Jivapriya, Jivanika, Bhisagvara, Jivanti, Pranada, Jivya, Kayastha, Sreyasi, Devi, Divya, Vijaya, Vahni, Netramita, Abhidha.

It is similar to Amrta. It is of seven types. Their description is as follows: Vijaya, Rohini, Putana, Amrta, Abhaya, Jivanti, Cetaki are the seven types of Abhaya.

Vijaya is like Alabu nabhi.
Rohini is Suvrtta.
Putana is Svalpa tvak yukta.
Amrta is Sthula mamsa yukta.
Abhaya is Pancasra.
Jivanti is Svarna varna yukta.
Cetaki is Trayasrantu.
These are the features and lakshanas of 7 types of Abhaya.

कषायाम्ला च कटुका तिक्ता मधुरसान्विता ।
इति पञ्चरसा पथ्या लवणेन विवर्जिता ।।

अम्लभावाज्जयेद् वातं पित्तं मधुरतिक्तकात् ।

कफं रूक्षकषायत्वात् त्रिदोषघ्नी ततोऽभया ||

प्रपथ्या लेखनी लघ्वी मेध्या चक्षुर्हिता सदा |
मेहकुष्ठव्रणच्छर्दिशोफवातास्त्रकृच्छ्रजित् ||
वातानुलोमनी हृंद्या सेन्द्रियाणां प्रसादनी |
सन्तर्पणकृतान् रोगान् प्रायो हन्ति हरितकी ||
तृष्णायां मुखशोषे च हनुस्तम्भे गलग्रहे |
नवज्वरे तथा क्षीणे गर्भिण्यां न प्रशस्यते ||
हरस्य भवने जाता हरिता च स्वभावतः |
सर्वरोगांश्च हरते तेन ख्याता हरितकी || (Dhn)

Kashaya, amla, katuka, tikta, madhura are the five rasas of Haritaki devoid of lavana rasa.

Due to amla taste it reduces vata; madhura, tikta rasa reduces pitta; due to ruksa guna and kashaya rasa, it reduces kapha and therefore it is tridosha hara.

It is pathya, lekhani, laghu in guna, medhya, cakshuhita, cures meha, kustha, vrana, chardi, sopha, vata asra, krcchra. It is vata anulomana, hrdya, indriya prasadani, santarpa karaka, roga haraka. Cures trsna, mukha sosa, hanustambha, galagraha, nava jvara, ksina, garbhinyam prasasyatam.

Since it cures of all the vyadhis by svabhava it is named as Haritaki.

विन्ध्याद्रौ विजया हिमाचलभवा स्या्च्चोतकी पूतना
सिन्धौ स्यादथ रोहिणी तु विजया जाता प्रतिष्ठानके |
चम्पायाममृताऽभया च जनिता देशे सुराष्ट्राह्वये
जीवन्तीति हरितकी निगदिता सप्तप्रभेदा बृधैः || (Rjn)

Vijaya is found in Vindhya mountains, Cetaki in Himachala mountain, Putana in Sindhi mountains, Rohini and Vijaya in the same place, Amrta and Abhaya in Campa desa and Jivanti in Saurastra desa.

नवा स्निग्धा घना वृत्ता गुर्वी क्षिप्ता च याम्भसी ।
निमज्जेत्सा सुप्रशस्ता कथिताऽतिरुणप्रदा ॥
नवादिगुणयुक्तत्वं तथैवात्र द्विकर्षता ।
हरितक्याः फले यत्र द्वयं तद् श्रेष्ठमुच्यते ॥ **(Bpn)**

That Haritaki which is nava, snigdha, ghana, vrtta, guru and sinks in water, is considered the best Haritaki. Nava haritaki is dvi karsa in weight. Haritaki phala, which is 2 karsha in weight, is the best one.

कफवातप्रशमनी भेदिनी दीपनी लघुः ।
अर्शोगुल्माहिता रुच्या जठरघ्नी हरीतकी ॥ **(Mdn)**

It is kapha vata hara, laghu in guna, bhedani, dipani, rucya, jathara agni karaka and cures arsa, gulma.

विजया सर्वरेगेषु रोहिणी व्रणरोपणी ।
प्रलेपे पूतना योज्या शोधनीर्थेऽमृता हिता ॥
अक्षिरोगऽभया शस्ता जीवन्ती सर्वरोगहृत् ।
चूर्णार्थे चेतकी शस्ता यथायुक्तं प्रयोजयेत् ॥
चेतकी परमा शस्ता हिता सुखविरेचिनी ।

सप्तनामानि जातिनां प्रधानं विजया स्मृता ॥
सुखप्रयोगा सुलभा सर्वरोगेषु शस्यते । **(Rjn)**

Vijaya is used in sarva roga, Rohini in vrana ropana, Putana in pralepa, Amrta for sodhana karma, Abhaya for aksi roga, Jivanti for sarva roga and Cetaki as churna. These are used accordingly. Cetaki is the best as it is sukha virecani.

Of the seven varieties Vijaya is given the first place because it is sukha in prayoga, sulabha, sarva roga hara.

हरीतकी पञ्चरसाऽलवणा तुवरा परम् ॥
रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी ।
चक्षुष्या लघुरायुष्या बृंहणा चानुलोमनी ॥
श्वासकासप्रमेहार्शःकुष्ठशोफोदरकृमीन् ।
वैसर्प्यग्रबणीरोगविबन्धविषमज्वरान् ॥
गुल्माध्मानव्रणच्छर्दिहिक्काकण्ठहृदामयान् ।
कामलां शूलमानाहं प्लीहानां च यकृद्भवम् ॥
अश्मरीं मूत्रकृच्छ्रं च मूत्राधातं च नाशयेत् ।

स्वादुतिक्तकषायत्वात्पित्तहृत् कफहृत्तु सा ॥
कटुतिक्तकषायत्वादम्लत्वाद्वातहृत् शिवा ।

पित्तकृत्कटुकाम्लत्वात् वातकृन्न कथं शिवा ॥
प्रभावदोषहन्तृत्वं सिद्धं यत्तत्प्रकाश्यते ।
हेतुभिः शिष्यबोधार्थं पूर्वं तु क्रियतेऽधुना ॥
कर्मान्यत्वं गुणैः साम्यं दृष्टामाश्रयभेदतः ।
यतस्ततो नेति चन्त्यं धात्रीलकुचयोर्यथा ॥

पथ्याया मज्जनि स्वादु स्नाय्वामम्लो व्यवस्थितः ।
वृन्ते तिक्तस्त्वचि कटुरस्थिस्थस्तुवरो रसः ॥

चर्विता वर्धयत्यग्निं पेषिता मलशोधनी ।
स्विन्ना संग्राहिणी पथ्या भृष्टा प्रोक्ता त्रिदोषनुत् ॥
उन्मीलनी बुद्धिबलेन्द्रियाणां
निर्मूलिनी पित्तकफानिलानाम् ।
विस्त्रंसिनी मूत्रशकृन्मलानां
हरीतकी स्यात्सह भोजनेन ॥
अन्नपानकृतान्दोषान्वातपित्तकफोद्भवान् ।

हरीतकी हरत्याशु भुक्तस्योपरि योजिता ॥

लवणेन कफं हन्ति पित्तं हन्ति सशर्करा ।
घृतेन वातजान् रोगान् सर्वरोगान् गुडान्विता ॥

सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात् ।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥

अध्वातिखिन्नो बलवर्जितश्च
रूक्षः कृसो लङ्घनकर्शितश्च ।
पित्ताधिको गर्भवती च नारी
विमुक्तरक्तस्त्वभयां न खादेत् ॥ (Bpn)

Haritaki has five tastes except lavana rasa, tuvara rasa is para. It is ruksa, laghu in guna, usna in veerya, svadu in paka, dipani, medhya, rasayani, caksushya, ayushya, brmhani, anulomani and cures svasa, kasa, prameha, arsa, kustha, sopha, udara, krmi, visarpa, grahani, vibandha, visama jvara, gulma, adhmana,vrana, chardi, hikka, kantah roga, hrdaya amaya, kamala, sula, anaha, plihagada, yakrd roga, asmari, mutrakrcchra and mutraghata.

Svadu,tikta,kashaya rasa pacifies pitta; katu,tikta,kashaya rasa pacifies kapha; amla rasa pacifies vata.

Then here arises a question why does not it increase vata and pitta due to katu and amla rasa? The answer to this is that, it is its prabhava, which reduces all the three doshas. The fact is that, it is said to be tridosha hara said with the intention to make the students understand.

Pathya majja is svadu in rasa, snayu is amla in rasa, vrnta is tikta in rasa, tvaca is katu in rasa, asthi is tuvara in rasa.

On carvana it is agni vardhaka, pesana it is mala sodhana, svedana it is sangrahini. Pathya is subjected to bhrsta it is tridosha hara.

If taken with food it is buddhi, indriya, bala prada, alleviates pitta, kapha and anila and causes visamsrana of mala and mutra. If it is taken after intake of food then with lavana it is kapha hara, with sarkara it is pitta hara, with ghrta it is vata hara and with guda it is sarva roga hara.

If taken with sindhutha, sarkara, sunthi, kana, madhu, guda as per the 6 seasons from varsha rtu respectively then it is rasayana in guna.

Tired persons, bala varjita, ruksa, krsa, langana, karsita, pitta adhika, garbhavatinari, vimukta rakta persons are contraindicated for haritaki sevana.

हरीतकी पञ्चरसा च रेचनी
कोष्ठामयघ्नी लवणेन वर्जिता ।
रसायनी नेत्ररुजापहारिणी
त्वगामयघ्नी किल योगवाहिनी ॥

बीजास्थितिक्ता मधुरा तदन्त
स्त्वग्भागतः सा कटुरुष्णवीर्या ।
मांसांशतश्चाम्लकषाययुक्ता
हरीतकी पञ्चरसा स्मृतेयम् ॥

सर्वप्रयोगे विजया च रोहिणी
क्षतेषु लेपेषु तु पूतनोदिता ।
विरेचने स्यादमृता गुणाधिका
जीवन्तिका स्यादिह जीर्णरोगजित् ॥
स्याच्चेतकी सर्वरुजापहारिका
नेत्रामयघ्नीमभयां वदन्ति ।
इत्थं यथायोगमियं प्रयोजिता
ज्ञेया गुणाढ्या न कदाचिदन्यथा ॥

चेतकी च धृता हस्ते यावत्तिष्ठति देहिनः ।
तावद्विरिच्यते वेगात्तत्प्रभान्न सं्शयः ॥

सप्तानामपि वाजीनां प्रधानं विजया स्मृता ।
सुखप्रयोगसुलभा सर्वव्याधिषु शस्यते ॥

हरते प्रसभं व्याधीन् भूयस्तरति यद्वपुः ।
हरीतकी तु सा प्रोक्ता तत्र कीर्दीप्तिवाचकः ॥

हरीतकी तु तृष्णायां हनुस्तम्भे गलग्रहे ।
शोषे नवज्वरे जीर्णे गुर्विण्यां नैव शस्यते ॥ (Rjn)

Haritaki has five rasas, it is recani, kostamaya hara devoid of lavana rasa, is rasayani, netra ruja hara, tvag amaya hara, kila hara and is yogavahini.

Bija asthi is tikta, madhura in rasa. The internal tvag bhaga is katu in rasa, usna in veerya. Mamsa amsa is amla, kashaya in rasa. This proves that Abhaya has five tastes.

Vijaya and Rohini are used in all diseases, Putana in lepa karya, Amrta in virecana karma, Jivantika in jirna roga and Cetaki in all diseases. Abhaya is netra roga hara; hence appropriately used, it acts accordingly and never becomes nirguna.

Cetaki type of haritaki if kept in hand for a long time, due to its prabhava causes virecana without doubt.

Of all the 7 types, Vijaya is the best because it is sukha karaka, which is readily available and is sarva vyadhi hitam.

That which removes diseases in a person immediately is called haritaki.

It should not be used in trsna, hanustambha, galagraha, sosa, navajvara, jirna jvara, garbhini.

हरितकी तु सम्प्रोक्ता पञ्चभिस्तु रसैर्युता ।
लवणेन च सा हीना योगवाही रसायनी ॥
अग्निदीप्तिकरी लघ्वी सरा मेध्या च लेखना ।
वातानुलोमनी हृद्या चक्षुष्या स्मृतिकारका ॥
वयसःस्थापनी बल्या बुद्धिदा कुष्ठनाशिनी ।
विवर्णतानाशिनी वै चेन्द्रियाणां प्रसादनी ॥
शिरोरोगं नेत्ररोगं वैस्वर्यं विषमज्वरम् ।
पुराणं च ज्वरं पाण्डूं हृद्रोगं कामिलां तथा ॥
शोषं शोफं मूत्रघातं ग्रहणीं चातिसारकम् ।
अश्मरीं च ज्वरं मेहं कृमीं श्वासं विषोदरम् ॥
कासं घर्मं मलस्तम्भमानाहं कर्णरोगकम् ।
अर्शं प्लीहां त्रिदोषं च गुल्मं हिक्कां व्रणं तथा ॥
उरुस्तम्भं च शूलं च नाशयेदरुचिं तथा ।

हरीतक्याः स्मृतं बीजं चक्षुष्यं गुरु वातनुत् ॥
पित्तनाशकरं चैव मुनिभिः परिकीर्त्तितम् । **(Nir)**

Haritaki is one, which has all the five rasas in it except lavana rasa. It is yogavahi, rasayani, agni diptikaraka, laghu and sara in guna, medhya, lekhana, vatanulomani, hrdya, caksushya, smrtikaraka, vayasthapani, balya, buddhida, kustha nasini, vivarnata nasini, indriyanam prasadanam. Cures siro roga, netra rogam, vaisvarya, visama jvara, purana jvara, pandu, hrdroga, kamala, sosa, sopha, mutraghata, grahani, atisara, asmari, jvara, meha, krmi, svasam, visodara, kasa, gharma, malastambha, anaha, karnaroga, arsa, pliha tridosha, gulma, hikka, vrana, urustambha, sula and aruci.

Its bija is caksushya, guru in guna that alleviates vata and pitta.

व्रण्यमुष्णं सरं मेध्यं दोषघ्नं शोफकुष्ठनुत् ।
कषायं दीपनं चाम्लं चक्षुष्यं चाभयापलम् ॥ **(Su.S.Su 46)**

It is svadu in rasa and paka, ruksha in guna, usna in veerya, ayushya, dipani, pacani, medhya, vayasthapani para, rasayani, caksushya, bala-buddhi-smrti prada, cures kustha.
Abhaya phalam is Kashaya, amla in rasa, usna in veerya, vranya, sara, medhya, doshaghnam, sopha, kustha hara, dipana and caksushya.

**कषायमधुरा पाके रूक्षा विलवणा लघुः ।**
**दीपनी पाचनी मेध्या वयसःस्थापनी परम् ॥**
**उष्णवीर्या सरायुष्या बुद्धीन्द्रिबलप्रदा ।**
**कुष्ठवैवर्ण्यवैस्वर्यपुराणविषमज्वरान् ॥**
**शिरोऽक्षिपाण्डुहृद्रोगकामलाग्रहणीगदान् ।**
**सशोषशोफातिसारमेहमोहवमिकृमान् ॥**
**श्वासकासप्रसेकार्शःप्लीहानाहगरोदरम् ।**
**विबन्धं स्त्रोतसां गुल्ममूरुस्तम्भरोचकम् ॥**
**हरीतकी जयेद्वाधींस्तांस्तांश्च कफवातजान् ॥ (A.Hr.Su 6)**

Kashaya in rasa, ruksa, laghu in guna, usna in veerya, madhura in paka, lavana rasa varjita, alleviates kapha and vata; dipani, pacani, medhya, vayasthapani para, sara, ayushya, buddhi, indriya, bala prada, cures kustha, vaivarnyam, vaisvarya, puranavisama jvara,siro-aksi roga,pandu, hrdroga, kamala, grahani, sosa, sopha, atisara, meha, moha, vami, krmi, svasa, kasa, praseka, arsa, pliha roga, anaha, gara, udara, vibandha srotasa, gulma, urustambha and arocaka
These are the properties of Haritaki.

**स्वादुपाकरसायुष्या रूक्षोष्णा बृंहणी लघुः ।**
**दीपनी पाचनी मेध्या वयसःस्थापनी परम् ॥**
**रसायनी च चक्षुष्या बलबुद्धिस्मृतिप्रदा ।**
**कुष्ठवैवर्ण्यवैस्वर्यपुराणविषमज्वरान् ॥**
**शिरोऽक्षिपाण्डुहृद्रोगकामलाग्रहणीगदान् ।**
**सशोषशोफातीसारमेहमोहवमिकृमीन् ॥**

श्वासकासप्रसेकार्शःप्लीहानाहगरोदरान् ।
विबन्धं स्त्रोतसां गुल्ममूस्तम्भमरोचकम् ।।
हिध्माध्मानव्रणान् शूलं त्रीन् दोषांश्च व्यपोहति ।
स्वाद्वम्लभावात्पवनं कटुतिक्ततया कफम् ।।
कषायमधुरत्वाच्च पित्तं हन्ति हरितकी ।
मज्जात्वक्स्नायुमांसास्थिस्थिताः पञ्चाभयोद्भवाः ।।

Haritaki is svadu in rasa, ruksha in guna, usna in veerya,svadu in paka, ayushya, dipani, pacani, medhya, vayasthapani para, rasayani, caksushya, bala, buddhi, smrti prada, cures kustha, vaivarnya, vaisvarya, purana visama jvara, siro-aksi roga, pandu, hrdroga, kamala, grahani, sosa, sopha, atisara, meha, moha, vami, krmi, svasa, kasa, praseka, arsa, pliha gada, anaha, udara, vibandha srotas, vataja gulma, arocaka, hidhma, adhmana, vrana, sula and tridosha.

Due to svadu and amla rasa, it reduces vata; katu and tikta rasa, it reduces kapha and due to madhura, kashaya rasa it reduces pitta. Five tastes each are found in majja, tvak, snayu, mamsa and asti. Svadu, katu, amla, tikta and kashaya are the five rasas in Haritaki.

Majja of pathya is guru, vata pitta hara and caksushya. It is of 3 types Niraja, Vanaja and Parvatiya, preceeding ones are the best.

That which due to time gets ripened on its own and falls on the ground is the best fruit. That which is new, snigdha, vrtta, guru and which sinks in water and that fruit which is of 2 karsha in weight is termed the best fruit. The rest are to be avoided. That which has all the above-mentioned properties and that which is of 2 karsha in weight alone are used. That which is eaten by worms, which is burnt by fire, which is found in water or ditch, which is found on the usara bhumi, and that which is split is to be avoided.

स्वादुकट्वम्लतिक्ताख्यकषायाः क्रमशो रसाः ।
पथ्यामज्जा च चक्षुष्यो वातपित्तहरो गुरुः ।।
नीरजा वनजा चैव पर्वतीया इति त्रिधा ।

यथोत्तरं पथ्यतमा विज्ञेया त्रिविधाऽभया ll
कालयोगात्स्वयं पक्वा पतिता च महीतले l
नवा स्निग्धायता वृत्ता गुर्वी क्षिता तथाम्भसि ll
निमज्जेद्या तथैकस्मिन् फले स्याच्च द्विकर्षता l
सर्वदा गुणकृत्सा तु ततोऽन्या तु विवर्जिता ll
नवादिगुणयुक्तत्वं तथैकत्वं द्विकर्षता l
हरीतक्याः फले यत्र तत्सर्वं गुणकृद् भवेत् ll
जन्तुजग्धा दवादग्धा जले पङ्के स्थितां पुनः l
ऊषरे च स्थितां भिन्नां वर्जयेत्तु हरितकीम् ll (Kdn)

Vaivarnya, Vaisvarya, purana visama jvara, siro-aksi roga, pandu, hrdroga, kamala, grahani, sosa, sopha, atisara, meha, moha, vami, krmi, svasa, kasa, praseka, arsa, pliha gada, anaha, udara, vibandha srotas, vataja gulma, arocaka, hidhma, adhmana, vrana, sula, tridosha.

due to svadu, amla guna it reduces vata, katu and tikta taste it reduces kapha, and due to madhura, kashaya rasa it reduces pitta. five tastes each are found in majja, tvak, snayu, mamsa and asti. svadu, katu, amla, tikta and kashaya are the five rasas in haritaki.

majja of pathya is caksushya, vata pitta hara, guru. it is of 3 types. niraja, vanaja, parvatiya. preceding ones are the best.

that which due to time gets ripened on its own and falls on the ground is the best fruit. that which is new, snigdha, vrtta, guru and that which sinks in water and that fruit which is of 2 karsha in weight is termed the best fruit. the rest are to be avoided. that which has all the above-mentioned properties and that which is of 2 karsha in weight alone are used. that which is eaten by worms, that which is burnt by fire, that which is found in water or ditch, that which is found on the usara bhumi, and that which is split is to be avoided.

.

हरीतकी पञ्चरसामुष्णामलवणां शिवाम् ।
दोषानुलोमनीं लघ्वीं विद्याद्दीपनपाचनीम् ।।
आयुष्यां पौष्टिकीं धन्यां वयसःस्थापनीं पराम् ।
सर्वदोषप्रशमनीं बुद्धीन्द्रियबलप्रदाम् ।।
कुष्ठं गुल्ममुदावर्त्तं शोषं पाण्ड्वामः मदम् ।
अर्शांसि ग्रहणीदोषं पुराणं विषमज्जवरम् ।।
हृद्रोगं सशिरोरोगमतिसारमरोचकम् ।
कासं प्रमेहमानाहं प्लीहानमुदरं नवम् ।।
कफप्रसेकं वैस्वर्यं वैवर्ण्य कामलां कृमीन् ।
श्वयथुं तमकं थर्दिं क्लेब्यमङ्गावसादनम् ।।
स्त्रोतो विबन्धान् विविधान् प्रलेपं हृदयोरसोः ।
स्मृतिबुद्धिप्रमोहं च जयेच्छीघ्रं हरीतकी ।।

अजीर्णिनो रूक्षभुजः स्त्रीमद्यविषकर्षिताः ।
सेवेरन्नाभयामेते क्षुत्तृष्णोष्णार्दिताश्च ये ।। (C.S.Chi)

Haritaki has 5 rasas devoid of lavana rasa and is siva.

It is laghu in guna, sarva dosha prasamana, dosha anulomani, dipana, pacna, ayusya, paustika, dhanya, vayasthapani para, buddhi,indriya,bala prada. Cures kustha, gulma, udavarta, sosa, pandu, mada, arsa, grahani, purana visama jvara, hrdroga, siro roga, atisara, arocaka, kasa, prameha, anaha, pliha, udara nava, kapha praseka, vaisvarya, vaivarnya, kamala, krmi, svayathu, tamaka, chardi, klaibya, vyanga, ava sadana, srota vibandha vividha, pralepa of hrdaya and uras, smrti buddhi pramoha jayet sighra.

Persons having ajirna, ruksa bhuja, stri- madya- visa karsita, ksut, trsna, usna, ardita are contraindicated from taking Haritaki.